Gyanshauryam, International Scientific Refereed Research Journal
© 2019 GISRRJ | Volume 2 | Issue 2 | ISSN : 2582-0095

# संस्कृतशिक्षणे निदानात्मकोपागम



डॉ॰ दातारामपाठक.
संविदाध्यापक:, शिक्षाशास्त्रविभाग:
राष्ट्रियसंस्कृतसंस्थानम्, भोपालपरिसर:

**शोधसार**

सारांशरूपेण निदानात्मकोपागमस्य प्रयोग: छात्रसौकर्यार्थं भवति। यदा छात्रस्य या काऽपि समस्या भवति तस्या: समाधानम् अस्मिन् उपागममाध्यमेनैव भवति। अत: उपागमोऽयं प्रयोगे अवश्यम् करणीयम् ।

**शब्द कुट –** वाचनम्, भाषा, लेखनम्, उच्चारणम्, व्याकरणम्, अंकगणितम् ।

निदानात्मकोपागमे शिक्षार्थिषु वंश – लिङ्ग – वय: परिवेषादि विभिन्नेभ्य: कारणेभ्य: वैयक्तिकभिन्नता: भवन्ति। केचन धीमन्त: भवन्ति। केचन अल्पबुद्धय: भवन्ति। येषां अल्पबुद्धि: भवति अथवा ये छात्रा न्यूना: भवन्ति तेषां छात्राणां निदानात्मकोपचार: निदानात्मकोपागमेन क्रियते। यथा वैद्य: औषधिमाध्यमेन रुग्णस्य उपचारं करोति। तथैव शिक्षक: अपि अस्योपागममाध्यमेन तस्य (छात्रस्य) निदानं करोति।

**परिभाषा अर्थश्च** – निदानम् इति शब्दस्य अर्थ: भवति मूलकारणम् अथवा रोगनिर्णय:। आङ्ग्लभाषायां (डायग्नॉसिस) इत्युच्यते ।

**परिभाषा-**

चिकित्सक रोगिन: लक्षणानि परिशील्य रोगस्य निदानं करोति एवमेव शिक्षकोऽपि छात्राणां विषयगतमन्दताम् अधिगमसम्बद्धत्रुटि:, लोपांश्च ज्ञात्वा तेषां निदानं करोति। योकं सिंसन् महोदयारनुसारं 'निदानं एका कला, यया कलया छात्रेषु विद्यमानै: चिह्नै:, लक्षणैर्वा कस्या अपि कठिनताया: ज्ञानं प्राप्यते।"

**निदानात्मकोपागमस्य उद्देश्यानि-**

प्रत्येककार्यस्य किमपि उद्देश्यं भवति। यदि कार्यस्य उद्देश्यं न भवति चेत् कार्ये सफलताऽपि न मिलिष्यति। अत: कार्ये प्रथमं उद्देश्यस्य निर्माणं भवेत्। उद्देश्याधारेण कार्ये सफलता मिलति। एवमेव निदानात्मकोपागमस्याऽपि केचन उद्देश्यानि सन्ति। तेषां विवरण निम्नपंक्तौ विद्यते। तद्यथा –

1. छात्रेषु पाठ्यपुस्तकसम्बंधिताना जन्मजात अथवा स्वाभाविककठिनतानां ज्ञानप्राप्ति स्यात् ।

2. छात्राणां पाठ्यविषयसम्बद्धनां विविधकठिनतानां च अवगमनम्।

3. छात्राणां व्यक्तित्वस्य विश्लेषणम् ।

4. छात्राणां समस्यायाः समाधानम् ।

5. विभिन्नेभ्यः घटकेभ्यः छात्राणां समाधानम् ।

**निदानात्मकोपागमस्य क्षेत्रम्-** संसारेऽस्मिन् निदानात्मकोपागमस्य बहूनि क्षेत्राणि वर्तन्ते। शिक्षाक्षेत्रे निदानात्मकोपागमस्य क्षेत्राणि–

| | | |
|---|---|---|
| 1. वाचनम् | 2. भाषा | 3. लेखनम् |
| 4. उच्चारणम् | 5. व्याकरणम् | 6. अंकगणितम् । |

(1) **वाचनम्** - निदानात्मकोपागमे वाचनम् वचनरूपेण निदानम् इत्यस्ति।

(2) **भाषा** - निदानात्मकोपागमे भाषायाः स्पष्टता अवश्यमेव स्यात्। शब्दस्य प्रयोगः 'किमर्थं एवं च 'कुत्र' इति सन्दर्भस्य ज्ञानम् अवश्यमेव करणीयम् । अन्यथा सन्देशस्य ग्रहणे अनेकभ्रमाः सम्भवेयुः ।

(3) **लेखनम्** - लिखितरूपेण समस्यायाः समाधानं अस्मिन् क्षेत्रे वर्तते ।

(4) **उच्चारणम्** - शब्दस्य वाक्यस्य वा उच्चारणमाध्यमेन याः समस्याः अन्तर्निहिताः भवन्ति, ताः सर्वाः उच्चारणे एव भवन्ति।

(5) **व्याकरणम्** - अस्मिन् क्षेत्रे व्याकरणिकसमस्यायाः समाधानं वर्तते।

(6) **अंकगणितम्** - निदानात्मकोपागमे गणितमाध्यमेन समस्या समाधानं अस्मिन् क्षेत्रे भवति।

एतत् अतिरिक्तं छात्राणां निदानावसरे इमे महत्त्वपूर्णाः विषयाः वर्तन्ते। तद्यथा–

1. शारीरिक स्वास्थ्यम् ।

2. सम्वेगात्मकस्थितिः ।

3. बुद्धिस्तरः ।

4. सामाजिक स्तर ।

5. आर्थिकस्तरः ।

6. शिक्षणपद्धतिः ।

7. छात्राणां अभिरुचिः ।

8. कार्यसङ्कल्पः ।

**निदानात्मकोपागमस्य प्रकाराः** - अत्र निदानात्मकोपागमस्य प्रकारद्वयं वर्तते। तद्यथा- (1) व्यक्तिकेन्द्रितम् (2) समूहकेन्द्रितम्

**(1) व्यक्तिकेन्द्रितम्-** अनेनपरीक्षणेन विशेषलोपाः, विशिष्टगुणाश्च परिचिताः भवति।

**(2) समूहकेन्द्रितम् -** अनेन एकस्य विशिष्टसमूहस्य सामूहिकत्रुटीनां, लोपानां वा परीक्षणं क्रियते।

**निदानात्मकपरीक्षणपत्रस्य निर्माणम्**

निदानात्मकोपागमेऽस्मिन् परीक्षणं कथं भवेत् इति विषयमाधारीकृत्य अस्योपागमे परीक्षणस्य केचन बिन्दवः अधः वर्तन्ते। यथा–

1. त्रुटिसंकलनम्।

2. त्रुटिकारणम् ।

3. त्रुटिनिवारणोपायाः ।

4. नीलपत्रनिर्माणम् ।

**(1) त्रुटिसंकलनम्** – उपागमेऽस्मिन् त्रुटेः सङ्कलनम् भवति।

**(2) त्रुटिकारणम्** – निदानात्मकोपागमे त्रुटेः कारणं ज्ञात्वा तस्य समाधानं भवति।

**(3) त्रुटिनिवारणोपायाः** – उपागमेऽस्मिन् त्रुटेः निवारणं कृत्वा तस्योपायाः प्रददाति।

**(4) नीलपत्रनिर्माणम्** – अस्मिन्नपि नीलपत्रस्य निर्माणं भवति इत्यादयः सन्ति निदानात्मकपरीक्षणपत्रस्य निर्माणमिति ।

**निष्कर्षः** – सारांशरूपेण निदानात्मकोपागमस्य प्रयोगः छात्रसौकर्यार्थं भवति। यदा छात्रस्य या काऽपि समस्या भवति तस्याः समाधानम् अस्मिन् उपागममाध्यमेनैव भवति। अतः उपागमोऽयं प्रयोगे अवश्यम् करणीयम् ।

**सन्दर्भग्रन्थसूची:**

1. संस्कृतशिक्षणम् – प्रो॰ सन्तोषमित्तल
2. शिक्षामनोविज्ञानम् – डॉ॰ फतेहसिंह
3. शैक्षिक प्रविधिः – डॉ॰ रमाकान्तमिश्र
4. संस्कृतशिक्षणम् – डॉ॰ कम्भम्पाटि साम्बशिवमूर्ति
5. संस्कृतशिक्षणम् – डॉ॰ एस.डी. सिंह
6. हिन्दी शिक्षण – श्री सुरेन्द्र सिंह कादियान
7. हिन्दी शिक्षण – डॉ. दाताराम पाठक